दुढ़यिष्यति तां रज्जुं न भुच्यति यथा तथा ।
सर्व्वाणि वीजान्यादाय सवेदान् सप्त वै ऋषीन् ॥
तस्यां नावि निसन्नस्त्वं वर्त्तमाने जलप्लवे ।
दक्षेण सह संगम्य स्मरिष्यसि मनो मम ॥
स्मृतोऽहं तूर्णमायास्ये भवतो निकटं प्रति ।
श्यामलेनाथ श्टङ्गेण त्वं मां ज्ञास्यसि वै तदा ॥
यावत् प्रहतविध्वस्तं हतं स्याद्भुवनत्रयं ।
तावत् पृष्ठेन तां नावं वोढ़ाहं नात्र संशयः ॥
जलप्लवे तु संपूर्णे श्टङ्गे मम च तां तरिं ।
त्वं तया वटिकया तूर्णं सदा नेष्यसि वै दृढ़ं ॥
बद्धायां नावि मे श्टङ्गे दैवमानेन वत्सरान् ।
सहस्रं प्रेरयिष्यामि तां नावं शोषयन् जलं ॥
ततः शुष्केषु तोयेषु प्रोन्नमे शिखरे गिरेः ।
हिमाचलस्य बद्धा तां तस्मिन्नावमहं मनो ॥
त्वां वै गोपयिता नित्यं तावत्तु शोषये जलं ।
चिन्तितोऽहं त्वया यास्ये यदाहं निकटं तव ॥
श्टङ्गेण श्यामलेनैव त्वं मां ज्ञास्यसि पुष्करे ।
पुनः सृष्टिं ततः कृत्वा मत्प्रसादान्महामते ॥
त्रैलोक्यदुर्लभाम्टद्धिमवाप्स्यसि सनातनीं ।
अहमाराधितो येन जप्येन भवता मनो ॥
सर्व्वसिद्धिर्भवेत्तस्य यस्तोषयति तेन मां" ।

श्रीमार्कण्डेय उवाच ।

"इति दत्त्वा वरं तस्मै मत्स्यस्तेन नमस्कृतः ।
अन्तर्द्धे जगन्नाथो लोकानुग्रहकारकः ॥
स्वायम्भुवोऽपि भगवानन्तर्द्धानं गते हरौ ।
यथोक्तं हरिणा पूर्व्वं नावं रज्जुं तथाकरोत् ॥
सर्व्वयाज्ञियवृक्षौघान् छित्त्वा स्वायम्भुवस्तदा ।
उद्देन कारयामास नावं दृढ़तरां ततः ॥
तेषां वल्कसमुद्भूतसूत्रसंघैर्वटीरिकां ।
पूर्व्वोक्तेन प्रमाणेन कारयामास वै मनुः ॥
ततः कालेन महता वृत्तं युद्धं महाद्भुतं ।
विष्णोर्यज्ञवराहस्य सरभस्य हरस्य च ॥
ततो जलप्लवे भूते विध्वस्ते भुवनत्रये ।
तया रज्ज्वा तरिं बद्धा वीजान्यादाय सर्व्वशः ॥
वेदान्टषीन् तथा सप्त दक्षं चादाय वै मनुः ।
तस्यां नावि समाधाय तोयमग्ने चराचरे ॥
स्वायम्भुवस्तदा मत्स्यं हरिं सस्मार वै ततः ।
ततो जलानामुपरि सश्टङ्ग इव पर्व्वतः ॥
उद्दीप्तश्चैकश्टङ्गेण विष्णुर्मत्स्यस्वरूपधृक् ।
आगतस्तत्र न चिराद्यत्रास्ते स मनुर्हरिः ॥
तरिमारुह्य विपुले तोयराशौ भयङ्करे ।
यावच्चलाचलं तोयं तावत् पृष्ठे तरिं न्यधात् ॥
जले प्रकृतिमापन्ने श्टङ्गे बद्धा तरिं तदा ।
तां नावं चोदयामास सहस्रं दैववत्सरान् ॥
स्वयं नावमवष्टभ्य दधार परमेश्वरः ।
योगनिद्रा जगद्धात्री समासीदद्वटीरिकां ॥
ततः शनैः शनैस्तोये शोषं गच्छति वै चिरात् ।
पश्चिमं हिमवत् श्टङ्गमुन्मग्नं तोयमध्यतः ॥
दिसाहस्रैर्योजनानामुच्छ्रितस्य हिमप्रभोः ।
पञ्चाशत्तु सहस्राणि श्टङ्गं तत्तस्य चोच्छ्रितं ॥
तस्मिन् श्टङ्गे ततो नावं बद्धा मत्स्यात्मधृक् हरिः ।
जगाम शीघ्रमायाशु जनानां जगतां पतिः ॥

एवं हि मत्स्यरूपेण वेदास्त्रातास्तु शार्ङ्गिणा ।
कपिलस्य तु शापेन कृतोऽप्याकालिको लयः ॥
आकालिकोऽयं प्रलयो यतो भगवता कृतः ।
इति वः कथितं सर्व्वं यथावत् द्विजसत्तमाः" ॥
इति कालिकापुराणे ३२ अध्यायः ॥

आकालिकी, स्त्री, (अकाल + ठञ् + ङीप् ।) विद्युत् । इति हेमचन्द्रः ॥

आकाशः, पुं, स्त्री, (आ समन्तात् काशन्ते दीप्यन्ते सूर्य्यादयो यत्र । आ + काश् + घञ् ।) पञ्चभूतान्तर्गतभूतविशेषः । स तु शून्यः । तत्पर्य्यायः । द्योः २ द्यौः ३ अभ्रं ४ अभ्रं ५ व्योम ६ पुष्करं ७ अम्बरं ८ नभः ९ अन्तरीक्षं १० अन्तरिक्षं ११ गगनं १२ अनन्तं १३ सुरवर्त्म १४ खं १५ वियत् १६ विष्णुपदं १७ विहायः १८ । इत्यमरः ॥ नाकः १९ अनङ्गः २० नभसं २१ मेघवेश्म २२ महाविलं २३ । इति जटाधरः ॥ मरुद्वर्त्म २४ मेघवर्त्म २५ त्रिपिष्टपं २६ । इति शब्दरत्नावली ॥ न्यायमते अस्य सामन्यगुणाः सङ्ख्यादिपञ्च । विशेषगुणः शब्दः । स तु नित्यः अशरीरी च । अस्येन्द्रियं कर्णः । सत्वेकः किन्तु उपाधिभेदेन नाना भवति ।
("शब्दः श्रोत्रेन्द्रियग्राह्यं छिद्राणि च विविक्तता ।
वियतः कथिता एते गुणागुणविचारिभिः" ॥
तथा च भाषापरिच्छेदे ।
"आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ।
इन्द्रियं तु भवेत् श्रोत्रमेकः सन्नप्युपाधितः" ॥)
वेदान्तमते स जन्यः ॥

आकाशगङ्गा, स्त्री, (आकाशपथवाहिनी गङ्गा ।) स्वर्गगङ्गा । यथा, शिवरात्रिव्रतकथायां,—
"आकाशगङ्गासलिलतरङ्गपवनादिते ।
त्रैगुण्यललिते स्वासमरुद्भिरुपवीजिते" ॥
("नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे" ।
इति रघौ १ । ७८ ।
"उभौ यदि व्योम्नि पृथग् प्रवाहा-
वाकाशगङ्गापयसः पतेताम्" । इति माघः ।)

आकाशजननी [न्] पुं, (आकाशमार्गस्य जननी ।) प्रगण्डीमध्यस्थितजनानां वाह्यार्थदर्शनार्थानि क्षुद्रच्छिद्राणि । यद्द्वारा आग्नेयास्त्रगुलिकाः प्रक्षिप्यन्ते । इति राजधर्म्मः ॥ (आकाशजननी स्त्री आकाशपथस्य जननीव पोषिका । इति केचित् ।)

आकाशदीपः, पुं, (आकाशे दीयमानो दीपः ।) कार्त्तिकमासे भगवदुद्देशेन नभसि दत्तप्रदीपः । यथा । कार्त्तिके आकाशदीप उक्तो निर्णयामृते पुष्करपुराणे ।
"तुलायां तिलतैलेन सायंकाले समागते ।
आकाशदीपं यो दद्यात् मासमेकं हरिं प्रति ॥
महतीं श्रियमाप्नोति रूपसौभाग्यसम्पदम्" । इति तद्विधिश्च हेमाद्रौ आदिपुराणे ।
"दिवाकरेऽस्ताचलमौलिभूते
गृहाददूरे पुरुषप्रमाणं ।
यूपाकृतिं यज्ञियवृक्षदारु-
मारोप्य भूमावथ तस्य मूर्द्धि ॥
यवाङ्गुलच्छिद्रयुतास्तु मध्ये
द्विहस्तदीर्घा अथ पट्टिकास्तु ।
कृत्वा चतस्रोऽष्टदलाकृतीस्तु
याभिर्भवेदष्टदिशानुसारी ॥
तत्कर्णिकायान्तु महाप्रकाशो
दीपः प्रदेयो दलगास्तथाष्टौ ।
निवेद्य धर्म्माय हराय भूम्यै
दामोदरायाप्यथ धर्म्मराज्ञे ॥
प्रजापतिभ्यस्त्वथ सत्पृत्भ्यः
प्रेतेभ्य एवाथ तमःस्थितेभ्यः" । इति ।
अपरार्के त्वन्यो मन्त्रो यथा,—
"दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे" ॥
इति निर्णयसिन्धौ २ परिच्छेदे कार्त्तिकमाहात्म्यं ॥

आकाशप्रदीपः, पुं, (आकाशे दीयमानः प्रदीपः ।) तुलायां दीयमानलक्ष्मीदामोदरसम्प्रदानाकाशदीपः । तथाच ब्रह्माण्डपुराणे ।
"तुलायां तिलतैलेन सायं सन्ध्यासमागमे ।
आकाशदीपं यो दद्यात् मासमेकं निरन्तरं ।
सश्रीकाय श्रीपतये स श्रीमान् भुवि जायते ॥
ॐ दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपं ते प्रयच्छामि नमोऽनन्ताय वेधसे ॥
इति मन्त्रेण यो दद्यात् प्रदीपं सर्पिरादिना ।
आकाशे मण्डपे वापि स चाक्षयफलं लभेत् ।
विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकं ॥
अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः" ॥

आकाशमांसी, स्त्री, (आकाशजाता मांसी ।) सूक्ष्मजटामांसी । केदारे उत्पत्तिरस्याः । तत्पर्य्यायः । निरालम्बा २ खसम्भवा ३ शेवाली ४ सूक्ष्मपत्री ५ गौरी ६ पर्व्वतवासिनी ७ अभ्रमांसी ८ । अस्या गुणाः । हिमत्वं । शोथव्रणनाड़ीरोगनाशित्वं । लूतागर्द्दभकज्वालाहारित्वं । वर्णकारित्वञ्च । इति राजनिर्घण्टः ॥

आकाशमूली, स्त्री, (आकाशे भूमिरहितस्थाने मूलमस्याः । ङीप् ।) कुम्भिका । इति हारावली ॥ पाना इति ख्याता । (कुम्भिकाशब्देऽस्याः गुणा द्रष्टव्याः ।)

आकाशरक्षी [न्] पुं, (आकाशे उच्चस्थाने स्थितः सन् रक्षति यः । आकाश + रक्ष + णिन् ।) प्रगण्डीस्थितप्रणिधिः । दुर्गवहिःप्राचीरोपरिस्थितचरः । इति राजधर्म्मः ॥

आकाशवल्ली, स्त्री, (आकाशस्य वल्लीव । अत्युच्चशिखत्वात् ।) लताविशेषः । आकाशवेल अमरवेल इति ख्याता । तत्पर्य्यायः । खवल्ली २ दुस्पर्शा ३ व्योमवल्लिका ४ । अस्या गुणाः । मधुरत्वं । कटुत्वं । पित्तनाशित्वं । शुक्रवर्द्धकत्वं । रसायनत्वं । बलकारित्वं । दिव्यौषधिपरत्वं । इति राजनिर्घण्टः ॥
"आकाशवल्ली तु बुधैः कथितामरवल्लरी ।
खवल्ली ग्राहिणी तिक्ता पिच्छिलाक्ष्यामयापहा ।
तुवराग्निकरी हृद्या पित्तश्लेष्मामनाशिनी" ।
इति भावप्रकाशः ॥